**ब(व)हुरसा** स्त्री० ६ब० । १महाज्योतिष्मत्याम् राजनि० । २नानारसवति त्रि० ।

**बहुरुहा** स्त्री बहु रोहति रुह—क । कन्दगुडूच्यां राजनि०

**ब(व)हुरूप** पु० ६ब० । १सर्जरसे (धुना) अमरः । २शिवे, ३विष्णौ ४सरटे ५कामे मेदि० ६केशे ७ब्रह्मणि शब्दर० । ८बुद्धभेदे त्रिका० ९नानारूपवति त्रि० ।

**बहुरेतस्** पु० ६ब० । ब्रह्मणि चतुर्मुखे शब्दरत्ना० । [द्वारा

**ब(व)हुरोमन्** त्रि०६ब० । १अनेकरोमवति रोमशे । २मेषे पु०

**ब(व)हुल** त्रि०ब(व)हि—कुलच् नि० नलोपः । १अनेकसंख्यान्विते २प्रचुरे । ब(व)हूनि लाति ला—क । ३अग्नौ ४कृष्णपक्षे पु० मेदि० । "ब(व)हुलेऽपि गते निशाकरः" कुमारः । ५आकाशे ६सितमरिचे न० ७कृष्णवर्णे ८तद्वति त्रि० ९एलायां १०नीलिकायां ११गवि स्त्री मेदि० । १२देवीभेदे स्त्री कालिकापु०२३अ० अग्निदैवतत्वात् १३कृत्तिकानक्षत्रे स्त्री ब०व० मेदि० ।

**बहुलगन्धा** स्त्री० ६ब० । एलायाम् राजनि० ।

**ब(व)हुलच्छद** पु०६ ब० । रक्तशोभाञ्जने राजनि० ।

**बहुलवण** न० नित्य०क० । ऊषरभूमिजे लवणभेदे राजनि० ।

**बहुलाश्व** पु० मैथिलवंश्ये नृपभेदे भाग० ९।१३।१६ ।

**ब(व)हुलीकृत** त्रि० ब(व)हुल+च्वि—कृ—क्त । (आगड़ा) बुषस्यापसारणेन राशीकृते खलस्थे १धान्ये, अमरः । २राशीकृतमात्रे च ।

**बहुवचन** न० बहुत्वं वक्ति वच—ल्यु । "द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनम्" पा० उक्ते बहुत्वबोधके जस्प्रभृतौ सुब्विभक्तौ भिप्रभृतौ २तिङ्विभक्तौ च ।

**ब(व)हुवल्क** पु० ६ब० । प्रियाले । (पियाशाल) राजनि० ।

**ब(व)हुवारक** पु० ब(व)हूनि वारयति अण्, ण्वुल् वा । श्लेष्मातके (लोना आता) शब्दर० ।

**बहुविध** त्रि० ६त० । नानाप्रकारे अमरः ।

**ब(व)हुविस्तीर्णा** स्त्री० ब(व)हु यथा तथा विस्तीर्णा वि+स्तृ—क्त । (कुचुंड़) १कुचिकावृक्षे शब्दच० । २अनेकविस्तारयुते त्रि० । [बीजवति त्रि०

**ब(व)हुवीज** पु०६ब० । १आतृप्ये वृक्षे (आता) शब्दच० । २प्रचुर-

**ब(व)हुवीर्य्य** पु० ६ब० । १विभीतके, (बयड़ा) जटा० । २तण्डुलीयशाके, (नटेशाक) ३शाल्मलिवृक्षे ४मरुवके च राजनि । ५भूम्यामलक्यां स्त्री राजनि० ।

**ब(व)हुव्रीहि** त्रि० ६ब० । १अनेकधान्यादियुक्ते "तत्पुरुष ! कर्म धारय येन यस्यां सदा बहुव्रीहिः" उद्भटः । व्याकरणोक्ते प्रायेण अन्यपदार्थप्रधाने २समासभेदे पु० । तल्लक्षणादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा बहुव्रीहिं लक्षयति । "बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः । निरूढ़या लक्षणया स्वांशज्ञापकशब्दवान्" समास इति प्रकृतं तथा च स्वांशस्य निरूढ़लक्षणया ज्ञापकेन शब्देन घटितः स्वगर्भस्य यादृशार्थस्य सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थसम्बन्धिबोधेन बहुव्रीहिरित्यर्थः । आरूढ़वानरोवृक्ष इत्यत्राऽऽरूढ़ोवानरो यमिति व्युत्पत्त्या स्वकर्मकारोहणकर्तृवानरसम्बन्धित्वेन वृक्षं, पीतपयस्कं पात्रमित्यत्र पीतं पयोयेन इति रीत्या स्वकरणकपानकर्मजलसम्बन्धित्वेन पात्रम्, पक्वतण्डुलस्थैत्र इत्यत्र पक्वस्तण्डुलो येनेति दिशा स्वकर्तृकपाककर्मतण्डुलसम्बन्धित्वेन चैत्रं, दत्तदक्षिणोद्विज इत्यत्र दत्ता दक्षिणा यस्मै इति क्रमेण स्वसम्प्रदानकदानकर्मदक्षिणासम्बन्धित्वेन द्विजं, पतितपत्रस्तरुरित्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापादानकपतनाश्रयपत्रसम्बन्धित्वेन तरुं, चित्रगुरित्यत्र चित्रा गौर्यस्येति वाक्यानुसारेण स्वाभिन्नस्वगोसम्बन्धित्वेन चैत्रम्" रक्तपटः काय इत्यत्र रक्तः पटो यत्रेति व्युत्पत्त्या रक्ताभिन्नस्ववृत्तिपटसम्बन्धित्वेन कायम्" एवं वाणच्छिन्नकरोनर इत्यादावपि । वाणेन छिन्नः करो येन यस्य वा इत्यादि विग्रहे वाणकरणकस्वकर्तृकच्छेदाकर्मकरसम्बन्धित्वादिना नरादिकं बहुव्रीहिर्बोधयतीति सर्वत्र स्वगर्भतत्तदर्थसम्बन्धित्वेन धर्मिणामवगमः । दक्षिणपूर्वा पूर्वोत्तरेत्यादिविदिग्बहुव्रीहिस्थले दक्षिणाया पूर्वा यस्या इत्यादिविग्रहेण स्वपार्श्वस्यदक्षिणसहितपूर्वदिक्सम्बन्धित्वादिना आग्नेयीप्रभृतीनां विदिशां बोधः । अस्तिक्षीरा गौरीत्यादावप्यस्ति क्षीरं यस्या इत्यादिविग्रहेणास्तित्ववत्स्वक्षीरसम्बन्धित्वादिप्रकारेण गवादेरवगतिः । इयांस्तु विशेषो यत्रैकेषाम्मतेऽस्तीत्यादिकं तिङन्तमन्येषां मते तत्प्रतिरूपकाव्ययमिति । उप समीपे दश येषामिति समीपगणितत्वार्थकषष्ठ्या विग्रहादुपदशाः शकुनय इत्यादौ स्वसमीपगणितदशसम्बन्धित्वेन नवानामेकादशानाञ्च पक्षिणामवगमस्तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्य्याप्तसंख्यासमीपगणितदशत्वसम्बन्धित्वेनैव नवादेर्बोध इति दुर्गप्रभृतयः । अधिका दश येषामित्यादिविग्रहे अधिकदशाः पुरुषा इत्यादावपि स्वपर्य्याप्तसंख्याधिकदशवृत्तिसंख्या-